ददृशातेऽथ तौ वीरौ रम्यं तालवनं महत् ॥
तौ तालपर्णप्रकरे रम्ये तालवने रतौ ।
चेरतुः परमप्रीतौ वृषपोताविवोद्धतौ ॥
स तु देशः समः स्निग्धः सुमहान् कृष्णमृत्तिकः ।
दर्भप्रायस्थलीभूतो लोष्टपाषाणवर्ज्जितः ॥
तालैस्तैर्विपुलस्कन्धैरुच्छ्रितैः श्यामपर्णिभिः ।
फलाग्रशाखिभिर्भाति नागहस्तैरिवोच्छ्रितैः ॥
तत्र दामोदरो वाक्यमुवाच वदतांवरः ।
अहो तालफलैः पक्वैर्वासितेयं वनस्थली ॥
स्वादून्यार्य्य ! सुगन्धीनि श्यामानि रसवन्ति च ।
पक्वतालानि सहितौ पातयावो लघुक्रमौ ॥
यद्येषामीदृशो गन्धो माधुर्य्यघ्राणतर्पणः ।
रसेनाऽमृतकल्पेन भवितव्यञ्च मे मतिः ॥
दामोदरवचः श्रुत्वा रौहिणेयो हसन्निव ।
पातयन् पक्वतालानि चालयामास तांस्तरून् ॥
तत्तु तालवनं नृणामसेव्यं दुरतिक्रमम् ।
निर्म्मायभूतमैरिणं पुरुषादालयोपमम् ॥
दारुणो धेनुको नाम दैत्यो गर्द्दभरूपधृक् ।
खरयूथेन महता वृतः समनुवर्त्तते ॥
स तत्तालवनं घोरं गर्द्दभः परिरक्षति ।
नृपक्षिश्वापदगणांस्त्रासयानः सुदुर्म्मतिः ॥
तालशब्दं स तं श्रुत्वा संघुष्टं फलपातनात् ।
नामर्षयत संक्रुद्धस्तालस्वनमिव द्विपः ॥
शब्दानुसारी संक्रुद्धो दर्पाविद्धसटाननः ।
स्तब्धाक्षो हेषितपटुः खुरैर्निर्द्दारयन्महीम् ॥
आविद्धपुच्छो हृषितो व्यात्तानन इवान्तकः ।
आपतन्नेव ददृशे रौहिणेयमुपस्थितम् ॥
तालानां तमधो दृष्ट्वा सध्वजाकारसन्नयम् ।
रौहिणेयं खरो दुष्टः सोऽदशद्दशनायुधः ॥
पद्भ्यामुभाभ्याञ्च पुनः पश्चिमाभ्यां पराङ्मुखः ।
जघानोरसि दैत्येन्द्रो रौहिणेयं निरायुधम् ॥
ताभ्यामेव स जग्राह पद्भ्यां तं दैत्यगर्द्दभम् ।
आवर्ज्जितमुखस्कन्धं प्रैरयंस्तालमूर्द्धनि ॥
स भग्नोरुकटिग्रीवो भग्नपृष्ठो दुराकृतिः ।
खरस्तालफलैः सार्द्धं पपात धरणीतले ॥
तं गतासुं गतश्रीकं पतितं वीक्ष्य गर्द्दभम् ।
ज्ञातींस्तथापरांस्तस्य तृणराजनि सोऽक्षिपत् ॥
सा भूर्गर्द्दभदेहैश्च तालैः पक्वैश्च पातितैः ।
बभासे छन्नजलदा द्यौरिवाव्यक्तशारदी ॥
तस्मिन् गर्द्दभदैत्ये तु सानुगे विनिपातिते ।
रम्यं तालवनं तद्धि भूयो रम्यतरं बभौ ॥"
तीर्थविशेषः । यथा, महाभारते । ३ । ८४ ।
८१—८३ ।
"ततो गच्छेत राजेन्द्र ! धेनुकं लोकविश्रुतम् ।
एकरात्रोषितो राजन् ! प्रयच्छेत्तिलधेनुकाम् ॥
सर्व्वपापविशुद्धात्मा सोमलोकं व्रजेद्ध्रुवम् ।
तत्र चिह्नं महाराज ! अद्यापि हि न संशयः ।
कपिला सह वत्सा वै पर्व्वते विचरत्युत ॥
सवत्सायाः पदान्यस्या दृश्यन्तेऽद्यापि भारत ! ।
तेषूपस्पृश्य राजेन्द्र ! पदेषु नृपसत्तम ! ।
यत् किञ्चिदशुभं पापं तत् प्रणश्यति भारत ॥")
षोड़शरतिबन्धान्तर्गतबन्धविशेषः । यथा,—
"सुप्तां स्त्रियं समालिङ्ग्य स्वयं सुप्तो रमेत् पुनः ।
लङ्गुलिङ्गं चालयेद्यो बन्धोऽयं धेनुकः स्मृतः ॥"
इति रतिमञ्जरी ॥
(अपरविवरणन्तु यथा,—
"व्यस्तहस्तयुगला निजे पदे
योषिदेति कटिरूढ़वल्लभा ।
अग्रतो यदि धनैरधोमुखी
धेनुकं वृषवदुच्यते प्रिये ! ॥")
धेनुकसूदनः, पुं, (धेनुकं गोवर्द्धनोत्तरपार्श्वस्थतालवनवासिनमसुरं निसूदयति बलराममुद्दिश्येति । सूद + णिच् + ल्युः ।) श्रीकृष्णः । इति त्रिकाण्डशेषः ॥ (बलरामः । इति पुराणम् ॥)
धेनुका, स्त्री, (धेनुरिव प्रतिकृतिः । धेनु + कन् । टाप् ।) हस्तिनी । (धेनुरेव । स्वार्थे कन् ।) गौः । इति मेदिनी । के, १२६ ॥ (यथा, महाभारते । ७ । ७६ । १८ ।
"इमां ते तरुणीं भार्य्यां त्वदाधिभिरभिप्लुताम् ।
कथं सन्धारयिष्यामि विवत्सामिव धेनुकाम् ॥")
धेनुदुग्धं, क्ली, (धेनोर्दुग्धमिव शुभ्रं फलमस्य ।) चिर्भिटः । इति राजनिर्घण्टः ॥ (धेनोर्दुग्धम् ।) गोक्षीरम् ॥
धेनुदुग्धकरः, पुं, (करोति वर्द्धयतीति । कृ + अच् । धेनोर्दुग्धमस्य करः । एतद्भक्षणेन धेनुदुग्धवर्द्धनादस्य तथात्वम् ।) गर्ज्जरः । इति राजनिर्घण्टः ॥
धेनुष्या, स्त्री, (धेनु + "संज्ञायां धेनुष्या ।" ४ । ४ । ८९ । इति सूत्रेण यत्प्रत्ययश्च निपात्यते ।) बन्धके स्थिता गौः । इत्यमरः । २ । ९ । ७२ ॥ यां बन्धकेन दत्त्वा अर्थं गृहीतवान् सा । गौर्म्मर्हिषी वा या दुग्धबन्धके स्थिता सा धेनुष्येति इष्टाः । इति भरतः ॥
धेनुकं, क्ली, (धेनूनां समूहः । "अचित्तहस्तिधेनोष्ठक् ।" ४ । २ । ४७ । इति ठक् ।) धेनुसमूहः । इत्यमरः । २ । ९ । ६० ॥ (स्त्रीणां करणभेदः । इति मेदिनी । के, १०९ ॥)
धैर्य्यं, क्ली, (धीरस्य भावः कर्म्म वा । धीर + ष्यञ् ।) धीरता । धीरस्य भाव इत्यर्थे ष्यञ्प्रत्ययः ॥ तस्य लक्षणं यथा,—
"स्थिरचित्तोन्नतिर्या तु तद्धैर्य्यमिति कीर्त्त्यते ॥"
इत्युज्ज्वलनीलमणिः ॥
(इदं नायकसत्त्वजगुणानामन्यतमः । यथा, साहित्यदर्पणे । ३ । ५८ ।
"शोभा विलासो माधुर्य्यं गाम्भीर्य्यं धैर्य्यतेजसी ।
ललितौदार्य्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः ॥"
तल्लक्षणं यथा, तत्रैव । ३ । ६३ ।
"व्यवसायादचलनं धैर्य्यं विघ्ने महत्यपि ॥"
उदाहरणं यथा,—
"श्रुताप्सरोगीतिरपि क्षणेऽस्मिन्
हरः प्रसङ्ख्यानपरो बभूव ।
आत्मेश्वराणां न हि जातु विघ्नाः
समाधिभेदप्रभवो भवन्ति ॥")
धैवतः, पुं, (धीमतामयम् । धीमत् + अण् । पृषोदरादित्वात् मस्य वत्वम् ।) सप्तस्वरान्तर्गतषष्ठस्वरः । स तु नारदमते अश्वस्वरतुल्यः । (अश्वस्तु धैवतं रौतीति वचनात् ॥) तानसेनमते भेकस्वरतुल्यः । अस्योच्चारणस्थानं ललाटम् । व्याकरणमते दन्तः । अयं क्षत्त्रियवर्णः । अस्य जातिः षाड़वः । अस्य तानम् ७२० प्रत्येकतानम् ४८ समुदायेन ३४,५६० भवन्ति । इति संगीतशास्त्रम् ॥
"गत्वा नाभेरधोभागं वस्तिं प्राप्योर्द्ध्वगः पुनः ।
धावन्निव च यो याति कण्ठदेशं स धैवतः ॥"
तस्य श्रुतयस्तिस्रः । इति संगीतदामोदरः ॥
(यथा च सङ्गीतदर्पणे । १ । ५५ ।
"मदन्ती रोहिणी रम्येत्येता धैवतसंश्रयाः ॥"
अस्य ऋषिकुले उद्भवः । क्षत्त्रियो जातिः । पीतो वर्णः । श्वेतद्वीपे जन्म । ऋषिस्तुम्बुरुः । गणेशो देवता । उष्णिक् छन्दः । बीभत्सभयानकरसयोरूपयोगित्वम् । इति सङ्गीतदर्पणम् ॥)
धोड़ः, पुं, (धोरति चातुर्य्येण गच्छतीति । धोर गतिचातुर्य्ये + अच् । रस्य ड़त्वम् ।) सर्पविशेषः । धोड़ा इति भाषा । तत्पर्य्यायः । राजिलः २ डुण्डुभः ३ डुण्डुभः ४ । इति शब्दरत्नावली ॥
धोर, ऋ गतिचातुर्य्ये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ऋ, अदुधोरत् । गतौ चातुर्य्यं गतिचातुर्य्यम् । धोरन्त्या धोरणाक्रान्ता विनीता यस्य वाजिनः । इति दुर्गादासः ॥
धोरणं, क्ली, (धोरति गच्छत्यनेनेति । धोर + करणे ल्युट् ।) सर्व्ववाहनम् । हस्त्यश्वरथदोलादि । इत्यमरः । २ । ८ । ५८ ॥ (धोर + भावे ल्युट् ।) अश्वप्रथमगतिः । तत्पर्य्यायः । धौरितकम् २ धौर्य्यम् ३ धोरितम् ४ । इति हेमचन्द्रः । ४ । ३१२ ॥
धोरणिः, स्त्री, (धोरति क्रमशः प्राप्नोतीति । धोर + अनिः ।) परम्परा । इति जटाधरः ॥
धोरितं, क्ली, (धोर + क्तः ।) धोरणम् । अश्वप्रथमगतिः । इति हेमचन्द्रः । ४ । ३१२ ॥
धौरितकं, क्ली, (धौरितमश्वप्रथमगतिस्तेन कायतीति । कै + कः ।) धौरितकम् । इत्यमरटीकायां रमानाथः ॥
धौतं, त्रि, (धाव्यते स्मेति । धाव + कर्म्मणि क्तः ।) मार्ज्जितम् । धोया इति भाषा । तत्पर्य्यायः । निर्णिक्तम् २ शोधितम् ३ मृष्टम् ४ क्षालितम् ५ । इति हेमचन्द्रः । ६ । ७३ ॥ * ॥
"ईषद्धौतं स्त्रिया धौतं यद्धौतं रजकेन च ।
अधौतं तद्विजानीयाद्द्विजा दक्षिणपश्चिमे ॥"
इति कर्म्मलोचनम् ॥
धौतं, क्ली, (धाव + क्तः ।) रूप्यम् । इति राजनिर्घण्टः ॥
धौतकटः, पुं, (धौतः कटः । नित्यकर्म्मधारयः ।) स्थूलरचितभाण्डम् । धोकड़ा इति ख्यातः । तत्पर्य्यायः । स्योनः २ स्थूलः ३ प्रसेवकः ४ । इति